उपशास्त्री-I खण्ड साहित्य - तृतीय-पत्रम
काव्यदीपिका

Date __/__/____

प्र० (1) - आरम्भस्य किं स्वरूपम् ?

उत्तरम् - 'भवेदारम्भ औत्सुक्यं यन्मुखं फलसिद्धये'। अर्थात् नायकप्रधान-प्रयोजनस्य निष्पत्तये य उत्कटरागः स आरम्भः कथ्यते। यथा-रत्नावल्यां रत्नावल्यन्तः पुरनिवेशार्थं यौगन्धरायणस्य औत्सुक्यम् एव नायक नायिकादीनाम् औत्सुक्यम्।

प्र० (2) - नियताप्तिः नामावस्थायाः किं स्वरूपम् ?

उत्तरम् - 'अपायाभावतः प्राप्तिर्नियताप्तिस्तु निश्चिता'। अर्थात् अन्तरायस्याभावात् निश्चिता फलप्राप्तिः नियताप्तिर्भवेत्। यथा रत्नावल्याम् 'राजादेवी प्रसादनं त्यक्त्वा नान्यमुपायं पश्यामि। इति देवीवासवदत्तारूपान्तरायस्य प्रसादनेन निवारणात् नियतफल-प्राप्तिः सूचिता।

Renu Devi
13/09/20
राधा उमाकांत सं० महाविद्यालय सुरखसेना,
पूर्णिया।

Page No.

उपशास्त्री-II खण्ड साहित्य - तृतीय-पत्रम्

काव्यदीपिका

Saathi

Date ___/___/_____

प्र०(1) रस दोषान् लिखत ?

उत्तरम् – ये साक्षाद् रसमपकर्षयन्ति ते रसदोषाः। साक्षाद् रसमपकर्ष-कत्वं रसदोषत्वमिति भावः। रसशब्दोऽत्र रसाभासादीनामपि उपलक्षणम्। ते च रसदोषाः चतुर्दश भवन्ति। उक्तञ्च –

रसस्योक्तिः स्वशब्देन स्थायिसञ्चारिणोरपि ।
प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः ॥
अकाण्डे प्रथनच्छेदावङ्गस्याप्यति विस्तृतिः ।
अङ्गिनोऽननुसन्धानं प्रकृतीनां विपर्ययः ॥
इत्यादिकाः सहृदयैः रसे दोषाः प्रकीर्तिताः ॥

प्र०(2) – सलक्षणान् गुणभेदान् स्पष्टयत ?

उत्तरम् – रसस्योत्कर्षत्वे सति रसाऽव्यभिचारिस्थितत्वं गुणत्वम्, अव्यभिचारेण रसोपकारकत्वं वा गुणत्वम् इति। स च त्रिविधः – माधुर्यम्, ओजः प्रसादश्चेति। उक्तं च मम्मटेन –

माधुर्यौजः प्रसादाख्यास्त्रयस्ते न पुनर्दश ।

Renu Devi
13/09/20

राधा उमाकांत सं० महावि० सुखसेना, पूर्णिया ।

शास्त्री - I खण्ड साहित्य

अभिज्ञानशाकुन्तलम्

द्वितीयोऽङ्कः

अभिमुखे मयि संहृतमीक्षणं
हसितमन्यनिमित्तकृतोदयम् ।
विनयवारितवृत्तिरतस्तया
न विवृतो मदनो न च संवृतः ॥

उत्तरम्- प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदासप्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य द्वितीयोऽङ्कात् उद्धृतोऽस्ति।
प्रस्तुत श्लोके राजा स्वभावसरलाया शकुन्तलाया आत्मनि अनुरागविशेषं संभावयन् राजा विदूषकं कथयति -

व्याख्या- मयि अभिमुखे = संमुखं स्थिते सति, तस्याः मुखकमलं पश्यति सति तया ईक्षितं = नेत्रविलोकनं वा संहृतं = निवर्तितं गोपितं, पराङ्मुखं कृतम् अभिमुखोऽहं तया गूढं वीक्षित इत्यर्थः, अन्यत् = इतरत् निमित्तं = हेतु यस्य तत् अन्यनिमित्तम् अन्य निमित्तं = अन्यहेतुकं यथा स्यात्तथा कृतः = विहितः उदयः = आविर्भावः यस्य तत् अन्यनिमित्तकृतोदयम् कथान्तरव्याजेन तया हसितं = हासः कृतः, विनयेन = शीलेन वारिता नियमिता वृत्तिः = व्यापारो यस्य स विनयवारितवृत्तिः = लज्जावरुद्धप्रसरः मदनः = कामः मद्विषयकः प्रेमा तया = शकुन्तलया न विवृतः = न प्रकटीकृतः न च संवृतः = न च गोपायितः निगूहितः, मुग्धात्वेन दृष्टिपरावर्तनादिना निगूहितोऽपि मद्विषयको भावोऽन्यनिमित्तकथादिभिर्हसितादिभिर्वा स्वानुरागप्रकटनात् स्फुटीकृतः।

Renu Devi
13/09/20

राधा उमाकांत सं० महावि० सुखसेना, पूर्णिया)